INDIAN SCHOOL AL WADI AL KABIR

Class: IX	Department: Sanskrit (2nd Language)	Date of submission: NA
प्रश्न-उत्तर	Topic: मन: पूतं समाचरेत्	Note: Pl. file in portfolio

१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत –

(क) लोकः कस्य आचरणम् अनुकरोति? **उत्तर -** लोकः श्रेष्ठजनस्य आचरणम् अनुकरोति ।

(ख) कीदृशी वाणी वक्तव्या? **उत्तर -** सत्यपूतां वाणी वक्तव्या ।

(ग) लक्ष्मीः कम् उपैति ? **उत्तर -** लक्ष्मीः उद्योगिनं पुरुषसिंहम् उपैति ।

(घ) उत्तमजनाः कार्यं प्रारभ्य किं न कुर्वन्ति?

उत्तर- उत्तमजनाः कार्यं प्रारभ्य विघ्नैः पुनः - पुनः अपि प्रतिहन्यमानाः कार्यं न परित्यजन्ति ।

(ङ) धर्मस्य लक्षणानि कानि ? **उत्तर-** धृतिः, क्षमा, दमः, अस्तेयं,शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधः च धर्मस्य दश लक्षणानि सन्ति ।

(च) सकलाः कलाः कस्मात् सिध्यन्ति ? **उत्तर -** सकलाः कलाः अभ्यासात् सिध्यन्ति ।

(छ) सम्पदः कं वृणते ? **उत्तर -** सम्पदः विमृश्यकारिणं वृणते ।

२. अधोलिखितेषु श्लोकांशेषु रिक्तस्थानानि पूरयत –

(क) ..... *सहसा विदधीत न क्रियामविवेकः* ..... परमापदां पदम् ।

(ख) सन्तः ..... *परीक्ष्य* ..... अन्यतरद् भजन्ते ।

(ग) दैवं निहत्य कुरु ..... *पौरुषम्* ..... आत्मशक्त्या ।

(घ) स यत् ..... *प्रमाणम्* ..... कुरुते ।

(ङ) धीर्विद्या सत्यमक्रोधो ..... *दशकं* ..... धर्मलक्षणम् ।

३. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत –

(क) <u>नीचैः</u> विघ्नभयेन कार्यं न प्रारभ्यते । **कैः**

(ख) सकलाः कलाः अ<u>भ्यासात्</u> सिध्यन्ति । **कस्मात्**

(ग) <u>वस्त्रपूतं</u> जलं पिबेत् । **कीदृशं**

(घ) लक्ष्मीः <u>पुरुषसिंहम्</u> उपैति । **कम्**

(ङ) <u>सन्तः</u> परीक्ष्य अन्यतरद् भजन्ते । **के**

(च) <u>क्रियां</u> सहसा न विदधीत । **काम्**

४. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेत् वाचं मनः पूतं समाचरेत् ॥

(क) अस्मिन् श्लोके प्रथमं क्रियापदं किम् ? **न्यसेत्**

(ख) कं न्यसेत् ?	**पादं न्यसेत्**
(ग) कीदृशं पादं न्यसेत् ?	**दृष्टिपूतं पादं न्यसेत्**
(घ) द्वितीयं किं क्रियापदम् अस्ति?	**पिबेत्**
(ङ) किं पिबेत् ?	**जलम् पिबेत्**
(च) कीदृशं जलं पिबेत् ?	**वस्त्रपूतं जलं पिबेत्**
(छ) तृतीयं किं क्रियापदम् अस्ति?	**वदेत्**
(ज) कां वदेत् ?	**वाचम् वदेत्**
(झ) कीदृशीं वाणीं वदेत् ?	**सत्यपूतां वाणीं वदेत्**
(ञ) चतुर्थं किं क्रियापदम् अस्ति?	**समाचरेत्**
(ट) कथं समाचरेत् ?	**मनः पूतं समाचरेत्**

५. मञ्जूषातः पदानिचित्वा भावार्थेषु रिक्तस्थानानि पूरयत –

बुद्धिः, लक्ष्यं, पुरुषस्य, अभिप्रायं, धीराः, नूतनम्

(क) लक्ष्मीः प्रयत्नशीलस्य पराक्रमिणः .... **पुरुषस्य** .... समीपं स्वयम् आगच्छति। कापुरुषाः तु 'विधिः एव बलीयान्' इति वदन्ति।

ये पौरुषेण परिस्थितिम् अतिक्रम्य कार्याणि साधयन्ति ते एव .... **धीराः** ..... । प्रयत्नं कृत्वा अपि यदि .... **लक्ष्यं** ..... न प्राप्तं तर्हि तत्र दोषः नास्ति खलु।

(ख) पुरातनम् अस्ति इति कारणेन किमपि वस्तु तत्त्वं व्यक्तित्वं वा समीचीनं भवेदेव इति नियमः नास्ति। तथैव ..... **नूतनम्** ..... अस्ति इति कारणेन दोषरहितं भवेत् इत्यपि नियमः नास्ति। येषां .... **बुद्धिः** .... पक्वा अस्ति ते परीक्षण-निरीक्षणानन्तरम् एव उत्तमं स्वीकुर्वन्ति। किन्तु अज्ञानाः अन्येषाम् .... **अभिप्रायं**..... श्रुत्वा तदनुसारेण प्रवर्तन्ते।

६. श्लोकानाम् अन्वयेषु रिक्त स्था नानि पूरयत –

(क) सर्वाः ..**क्रिया:** ... अभ्यासेन (सिध्यन्ति)। .. **सकला:** .. कलाः अभ्यासात् (सिध्यन्ति) । ध्यानमौनादि (अपि) ... **अभ्यासात्** .... (सिध्यति) । अभ्यासस्य ... **दुष्करम्** .. किम् (अस्ति) ?

(ख) श्रेष्ठः यत् यत् ..... **आचरति** ... इतरः जनः तत् तत् एव (आचरति) ।

सः यत् .... **प्रमाणम्** ..... कुरुते, लोकः तत् .... **अनुवर्तते** ..... ।

७. यथोचितं मेलनं कुरुत –

श्लोकांशः	**स्रोतोग्रन्थः**
(क) पुराणमित्येव न साधु सर्वम्	४. *मालविकाग्निमित्रम्*
(ख) प्रारभ्य चोत्तमजनाः न परित्यजन्ति	३. *नीतिशतकम्*
(ग) यद्यदाचरति श्रेष्ठः	५. *श्रीमद्भगवदगीता*

(घ) धृतिः क्षमा दमोऽस्तेयम् १. *मनुस्मृतिः*

(ङ) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः २. *पञ्चतन्त्रम्*

८. रेखाङ्कितेषु पदेषु सन्धिविच्छेदं कुरुत –

यथा – यो बहून्यपि साधयेत् बहूनि + अपि

(क) धृतिः क्षमा दमोऽस्तेयम् । दमः + अस्तेयम्

(ख) पुराणमित्येव न साधु सर्वम् । पुराणम् + इति + एव

(ग) विघ्नैः पुनरपि प्रतिह न्यमानाः । पुनः + अपि

(घ) प्रारभ्य चोत्तमजनाः न परित्यजन्ति । च + उत्तमजनाः

(ङ) विघ्नविहता विरमन्ति मध्याः । विघ्नविहता + विरमन्ति

(च) लोकस्तदनुवर्तते । लोकः + तत् + अनुवर्तते

(छ) सन्तः परीक्ष्यान्यतरद्भजन्ते । परीक्ष्य + अन्यतरत् + भजन्ते

९. अत्र कतिचन विग्रहवाक्यानि दत्तानि सन्ति। तेषां समस्तपदानि पाठात् चित्वा लिखत –

विग्रहवाक्यानि	**समस्तपदानि**
यथा – मनसा पूतं समाचरेत्	मनः पूतम्
(क) विघ्नैः विहताः (कार्यात्) विरमन्ति ।	विघ्नविहताः
(ख) वस्त्रेण पूतं जलं पि बेत् ।	वस्त्रपूतम्
(ग) पुरुषः सिंहः इव तम् उपैति लक्ष्मीः ।	पुरुषसिंहम्
(घ) उत्तमाः जनाः न परित्य जन्ति ।	उत्तमजनाः
(ङ) न विवेकः परमापदां पदम् ।	अविवेकः

*************ISWK/QB/Dept of Sanskrit-7/10/2026/Sushil Sharma **************